* कारक प्रकरण *

कारक प्रकरण

* प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा । २·३·४६

→ मात्र शब्दस्य प्रत्येकं योगः । प्रातिपदिकार्थमात्रे लिंगमात्राद्याधिक्ये संख्यामात्रे च प्रथमा स्यात् ।

- नियतोपस्थितिकः प्रातिपदिकार्थः । अलिङ्गा नियतलिङ्गाश्च प्रातिपदिकार्थमात्र इत्यस्य उदाहरणम् । उच्चैः, नीचैः, कृष्णः, श्रीः, ज्ञानम् ।
- अनियतलिङ्गास्तु लिङ्गमात्राधिक्यस्य । तटः, तटी, तटम् ।
- परिमाणमात्रे द्रोणो व्रीहिः । द्रोणरूपं यत्परिमाणं तत् परिच्छिन्नो व्रीहिः इत्यर्थः । प्रत्ययार्थे परिमाणे प्रकृत्यर्थोऽभेदेन संसर्गेण विशेषणम्, प्रत्ययार्थस्तु परिच्छेद्यपरिच्छेदकभावेन व्रीहौ विशेषणमिति विवेकः ।
- वचनं संख्या । एकः, द्वौ, बहवः । इह उक्त अर्थत्वाद् विभक्तेरप्राप्तौ वचनम् ॥

* सम्बोधने च २·३·४७

→ इह प्रथमा स्यात् । हे राम!

* कारके 1·4·23
- इत्यधिकृत्य

* कर्म कारक *

* 'कर्तुरीप्सिततमं कर्म' 1·4·49
= कर्तुः ईप्सिततमं कर्म
⇒ कर्तुः क्रियया आप्तुम् इष्टतमं कारकं कर्मसंज्ञं स्यात्।
• कर्तुः किम्? माषेष्वश्वं बध्नाति। कर्मण ईप्सिता माषाः, न तु कर्तुः।

• तमप् ग्रहणं किम्? पयसा ओदनं भुङ्क्ते। कर्म इति अनुवृत्तौ पुनः कर्मग्रहणम् आधार निवृत्त्यर्थम्। अन्यथा गेयम् प्रविशति इति अत्रैव स्यात्।

* अनभिहिते [अनुक्ते, अकथिते] 2·3·1
→ इति अधिकृत्य

* कर्मणि द्वितीया 2·3·2
⇒ अनुक्ते कर्मणि द्वितीया स्यात्। हरिं भजति।
अभिहिते तु कर्मणि 'प्रातिपदिकार्थमात्रे' इति प्रथमैव। अभिधानं तु प्रायेण तिङ् कृत तद्धित समासैः।

• तिङ् - हरिः सेव्यते
• कृत् - लक्ष्म्या सेवितः
• तद्धित - शतेन क्रीतः शत्यः
• समासः - प्राप्त आनन्दो यं स प्राप्तानन्दः।

• क्वचित् निपातेन अभिधानम्। यथा - 'विषवृक्षोऽपि संवर्ध्य स्वयं छेत्तुम् असाम्प्रतम्।'
'साम्प्रतम् इत्यस्य हि युज्यत इति अर्थः'

तथायुक्तं चानीप्सितम् [1·4·50]

› इप्सिततमवत् क्रियया युक्तम् अनीप्सितमपि कारकं कर्मसंज्ञं स्यात्

• ग्रामं गच्छन् तृणं स्पृशति ।
ओदनं भुञ्जानो विषं भुङ्क्ते ।

* अकथितं च [1·4·51]

⇒ अपादानादिविशेषैः अविवक्षितं कारकं कर्मसञ्ज्ञं स्यात् ।

दुह्-याच्- पच्- दण्ड्- रुधि- प्रच्छि- चि- ब्रू- शासु- जि-मथ्- मुषाम्
कर्मयुक् स्यात् अकथितं तथा स्यात् नी-हृ-कृष्-वहाम् ॥

• दुह = गां दोग्धि पयः ।
• याच् = बलिं याचते वसुधाम् ।
• अविनीतं विनयं याचते ।

• पच् = तण्डुलान् ओदनं पचति
• दण्ड = गर्गान् शतं दण्डयति
• रुधि = व्रजम् अवरुणद्धि गाम्
• प्रच्छि = माणवकं पन्थानं पृच्छति
• चि = वृक्षं आचिनोति फलानि

} अकर्मक 16 धातुएँ

• ब्रू । शास् = माणवकं धर्मं ब्रूते शास्ति वा
• जि = शतं जयति देवदत्तम्
• मथ् = सुधां क्षीरनिधिं मथ्नाति
• मुषाम् = देवदत्तं शतं मुष्णाति
• नी-हृ-कृष- वहाम् = ग्रामम् अजां नयति, हरति, कर्षति, वहति वा ।

* 'अकर्मकधातुभिर्योगे देशः कालो भावो गन्तव्योऽध्वा च कर्मसंज्ञक इति वाच्यम्' (वा.)

⇒ कुरून् स्वपिति । मासमास्ते ।
गोदोहमास्ते । क्रोशमास्ते ॥

* गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणाम् अणिकर्ता स णौ [1.4.52] अभिमत. अभि

⇒ गत्याद्यर्थानां शब्दकर्मणाम् अकर्मणाम् च अणौ यः कर्ता स णौ कर्म स्यात् ।

- गति = शत्रून् अगमयत् स्वर्गं
- बुद्धि = वेदार्थं स्वान् अवेदयत्
- प्रत्यवसान = आशयत् च अमृतं देवान् (प्रत्यवसानार्थ) → भोजन
- शब्दकर्म = वेदम् अध्यापयद् विधिम्
- अकर्मक = आसयत् सलिले पृथ्वीं

⇓

शत्रूनगमयत्स्वर्गं वेदार्थं स्वानवेदयत् ।
आशयच्चामृतं देवान् वेदमध्यापयद्विधिम् ॥
आसयत्सलिले पृथ्वीं यः स मे श्रीहरिर्गतिः ॥

गति इत्यादि किम्? पाचयति ओदनं देवदत्तेन ।
अण्यन्तानां किम्? गमयति देवदत्तो यज्ञदत्तं तम् अपरः प्रयुङ्क्ते
गमयति देवदत्तेन यज्ञदत्तं विष्णुमित्रः ॥

* अधिशीङ्स्थाऽऽसां कर्म [1.4.46]

⇒ अधिपूर्वाणाम् एतेषाम् आधारः कर्म स्यात् ।

- अधिशेते अधितिष्ठति अध्यास्ते वा वैकुण्ठं हरिः ।

* अभिनिविशश्च [1.4.47]

⇒ अभि - नि इति एतत् संघातपूर्वस्य विशतेराधारः कर्म स्यात् ।

- अभिनिविशते सन्मार्गम्

* उपान्वध्याङ्वसः [1.4.48]

= उप - अनु - अधि - आङ्

- उपादिपूर्वस्य वसेताधारः कर्म स्यात् ।

उपवसति, अनुवसति, अधिवसति, आवसति वा वैकुण्ठं हरिः ।

* 'अभुक्त्यर्थस्य न' वा. ⇒ वने उपवसति

२ अभितः परितः समया निकषा हा प्रतियोगेऽपि' वा।
› अभितः कृष्णम्। परितः कृष्णम्। ग्रामं समया।
निकषा लंकाम्। हा कृष्ण अभक्तम्।
बुभुक्षितं न प्रतिभाति किंचिद्।

* अन्तराऽन्तरेणयुक्ते [२·३·४]
⇒ आभ्यां योगे द्वितीया स्यात्।
अन्तरा त्वां मां हरिः। अन्तरेण हरिं न सुखम्।

* कर्मप्रवचनीयाः
- इत्यधिकृत्य

* अनुर्लक्षणे
= लक्षणे द्योत्येऽनुरक्तसंज्ञः स्यात्। गति-उपसर्गसञ्ज्ञापवादः

* 'कर्मप्रवचनीययुक्ते द्वितीया'
= एतेन योगे द्वितीया स्यात्।
• पर्जन्यो जपम् अनु प्रावर्षत्। हेतुभूतजप- उपलक्षितं वर्षणम् इति अर्थः

* तृतीयार्थे
= अस्मिन् द्योत्येऽनुरुक्तसञ्ज्ञः स्यात्।
• नदीम् अनु अवसिता सेना। नद्या सह सम्बद्धेत्यर्थः। षिञ् बन्धने क्तः

* हीने
= हीने द्योत्येऽनुः प्राग्वत्। अनु हरिं सुराः। हरेः हीना इत्यर्थः।

* उपोऽधिके च (च = हीने)
= अधिके हीने च द्योत्य उपेत्यव्ययं प्राक् संज्ञं स्यात्।
अधिके सप्तमी वक्ष्यते।
हीने- उप हरिं सुरा

* लक्षणेत्थंभूताख्यानभागवीप्सासु प्रतिपर्यनुभव:
= एषर्थेषु विषयभूतेषु प्रत्यादय उक्तसंज्ञा: स्यु: ।
• लक्षणे- वृक्षं प्रति परि अनु वा विद्योतते विद्युत् ।
• इत्थंभूताख्याने - भक्तो विष्णुं प्रति परि अनु वा
• भागे - लक्ष्मीर्हरिं प्रति परि अनु वा । हरेर्भाग: इत्यर्थ: ।
• वीप्सायाम् - वृक्षं वृक्षं प्रति परि अनु वा सिञ्चति ।
अत्र उपसर्गत्व अभावात् न षत्वम् ।

* अधिपरी अनर्थकौ
= उक्तसञ्ज्ञौ स्त: । कुतोऽध्यागच्छति? कुत: पर्यागच्छति?
गतिसंज्ञाबाधात् गतिर्गतौ इति निघातो (अनुदात्त) न ।

* सु: पूजायाम्
= सु-सिक्तम् , सु-स्तुतम् । अनुपसर्गत्वान्न ष: ।
पूजायां किम्? सुषिक्तं किं तवाऽत्र । क्षेपोऽयम् ।

* अतिरतिक्रमणे च
= अतिक्रमणे पूजायां च अति: कर्मप्रवचनीयसञ्ज्ञ: स्यात् ।
• अति देवान् कृष्ण:

* अपि: पदार्थसंभावनान्ववसर्गगर्हासमुच्चयेषु
= एते द्योतेषु अपि उक्तसञ्ज्ञ: स्यात् ।
• 'सर्पिषोऽपि स्यात्' । अनुपर्सत्वान्न ष: । 'सर्पिष:' इति 'षष्ठी' तु अपिशब्दबलेन गम्यमानस्य बिन्दो: अवयवावयविभावसम्बन्धे ।
• अपि स्तुयाद् विष्णुम् - [सम्भावना] सम्भावनं शक्ति उत्कर्षम् आविष्कर्तुम् अत्युक्ति: ।
• अपि स्तुहि [अन्वसर्ग] - अन्ववसर्ग: कामचारानुज्ञा ,
• धिक् देवदत्तम् अपि स्तुयाद् वृषलम् ,[गर्हा]

अपि सिञ्च, अपि स्तुहि, समुच्चये ।

कालाध्वनोरत्यन्तसंयोगे [2·3·5]
= काल - अध्वनो - अत्यन्त - संयोगे
↓
मार्ग

= इह द्वितीया स्यात् । मासं कल्याणी । मासमधीते । मासं गुडधाना
क्रोशं कुटिला नदी । क्रोशमधीते । क्रोशं गिरिः ।
अत्यन्तसंयोगे किम्? मासस्य द्विरधीते । क्रोशस्य एकदेशे पर्वतः ।

करण कारक

* स्वतन्त्रः कर्ता [1·4·54]
= क्रियायां स्वातन्त्र्येण विवक्षितोऽर्थः कर्ता स्यात् ।

* साधकतमं करणम् [1·4·42]
= क्रियासिद्धौ प्रकृष्टोपकारकं कारकं कारणसञ्ज्ञं स्यात् ।
तमप् ग्रहणं किम्? गंगायां घोषः

* कर्तृकरणयोस्तृतीया [2·3·18]
= अनभिहिते कर्तरि करणे च तृतीया स्यात् । रामेण बाणेन हतो बाली ।

* प्रकृत्यादिभ्य उपसंख्यानम् (वा.)
= प्रकृत्या चारुः । प्रायेण याज्ञिकः । गोत्रेण गार्ग्यः ।
समेनैति । विषमेणैति । द्विद्रोणेन धान्यं क्रीणाति ।
सुखेन दुःखेन वा यातीत्यादि ।

* दिवः कर्म च [1·4·43]
⇒ दिवः साधकतमं कारकं कर्मसंज्ञं स्यात् चात् करणसञ्ज्ञम् ।
अक्षैरक्षान् वा दीव्यति:
↓
अक्षैः अक्षान

* अपवर्गे तृतीया [२·३·६]

= अपवर्गः = फलप्राप्तिः, तस्यां द्योत्यायां काल- अध्वनोः अत्यन्त-संयोगे तृतीया स्यात्।

· अह्ना क्रोशेन वाऽनुवाकोऽधीतः। अपवर्गे किम्? 'मासमधीतो नायातः'

* सहयुक्तेऽप्रधाने [२·३·१९]

⇒ सह- अर्थेन युक्ते अप्रधाने तृतीया स्यात्। पुत्रेण सहागतः पिता'

एवं साकं- सार्धं- समं योगेऽपि।

विनापि तद्योगं तृतीया, 'वृद्धो यूना' इत्यादि निर्देशात्।

* येनाङ्गविकारः [२·३·२०]

= येन अङ्गेन विकृतेन अङ्गिनो विकारो लक्ष्यते ततः तृतीया स्यात्।

अक्ष्णा काणः। अक्षिसम्बन्धिकाणत्वविशिष्ट इत्यर्थः।

* इत्थम्भूतलक्षणे [२·३·२१]

= कंचित्प्रकारं प्राप्तस्य लक्षणे तृतीया स्यात्।

जटाभिस्तापसः। जटाज्ञाप्यतापसत्वविशिष्ट इत्यर्थः।

* संज्ञोऽन्यतरस्यां कर्मणि [२·३·२२]

⇒ सम् उपसर्गपूर्वस्य जानातेः कर्मणि तृतीया वा स्यात्।

पित्रा पितरं वा संजानीते।

* हेतौ [२·३·२३]

= हेत्वर्थे तृतीया स्यात्। द्रव्यादिसाधारणं निर्व्यापारसाधारणं च हेतुत्वम्। करणत्वं तु क्रियामात्रविषयं व्यापारनियतं च।

दण्डेन घटः। पुण्येन दृष्टो हरिः। फलमपीह हेतुः। अध्ययनेन वसति।

* अशिष्टव्यवहारे दाणः प्रयोगे चतुर्थ्यर्थे तृतीया (वार्तिक)

⇒ दास्या संयच्छते कामुकः। → अशिष्टव्यवहार

धर्म्ये तु भार्यायै संयच्छति॥

※ सम्प्रदान कारक ※

* कर्मणा यमभिप्रैति स सम्प्रदानम् [1·4·32]
= दानस्य कर्मणा यमभिप्रैति स सम्प्रदानसञ्ज्ञः स्यात् ।

* चतुर्थी सम्प्रदाने [2·3·13]
= विप्राय गां ददाति । अनभिहित इत्येव । दानीयो विप्रः

* क्रियया यमभिप्रैति सोऽपि सम्प्रदानम् (वा.)
= पत्ये शेते ।

* यजेः कर्मणः करणसंज्ञा सम्प्रदानस्य च कर्मसंज्ञा (वा.)
= पशुना रुद्रं यजते ।
पशुं रुद्राय ददाति इत्यर्थः ।

* रुच्यर्थानां प्रीयमाणः [1·4·33]
= रुच्यर्थानां धातूनां प्रयोगे प्रीयमाणोऽर्थः सम्प्रदानं स्यात् ।
हरये रोचते भक्तिः । अन्यकर्तृकोऽभिलाषो रुचिः । हरिनिष्ठ-प्रीतेः भक्तिः कर्त्री ।
प्रीयमाणः किम् ? देवदत्ताय मोदकः रोचते पथि ।

* श्लाघह्नुङ्स्थाशपां ज्ञीप्स्यमानः [1·4·34]
= (श्लाघ- ह्नुङ्- स्था- शपां)
एषां प्रयोगे बोधयितुम् इष्टः सम्प्रदानम् स्यात् ।
गोपी स्मरात् कृष्णाय श्लाघते ह्नुते तिष्ठते शपते वा ।
ज्ञीप्समानः किम् ? देवदत्ताय श्लाघते पथि ।

* धारेरुत्तमर्णः [1·4·35]
= धारयतेः प्रयोगे उत्तमर्णः उक्तसंज्ञः स्यात् ।
भक्ताय धारयति मोक्षं हरिः ।
उत्तमर्णः किम् ? देवदत्ताय शतं धारयति ग्रामे ।

* स्पृहेरीप्सित: [1·4·36]
= स्पृहयते: प्रयोगे इष्ट: सम्प्रदानं स्यात् । पुष्पेभ्य: स्पृहयति । इप्सित: किम्? पुष्पेभ्यो वने स्पृहयति । इप्सितमात्रे इयं संज्ञा प्रकर्षविवक्षायां तु परत्वात् कर्मसंज्ञा - पुष्पाणि स्पृहयति ।

* क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोप: [1·4·37]
⇒ क्रुध् आदि अर्थानां प्रयोगे यं प्रति कोप: स उक्तसंज्ञ: स्यात् । हरये क्रुध्यति, द्रुह्यति, ईर्ष्यति, असूयति वा ।
यं प्रति कोप: किम्? भार्याम् ईर्ष्यति, मा एनाम् अन्यो द्राक्षीदिति क्रोधोऽमर्ष: । द्रोहोऽपकार: । ईर्ष्याऽक्षमा । असूया गुणेषु दोषाविष्करणम् । द्रोहादयोऽपि कोपप्रभवा एव गृह्यन्ते । अतो विशेषणं सामान्येन 'यं प्रति कोप:' इति ।

* क्रुधद्रुहोरुपसृष्टयो: कर्म [1·4·38]
= सोपसर्गयो: अनयो: (क्रुध्, द्रुह्) योगे यं प्रति कोप: तत् कारकं कर्मसञ्ज्ञं स्यात् ।
· क्रूरम् अभिक्रुध्यति, अभिद्रुह्यति वा ।

* राधीक्ष्योर्यस्य विप्रश्न: [1·4·39]
= एतयो: (राध्, ईक्ष्) कारकं सम्प्रदानं स्यात्, यदीयो विविध: प्रश्न: क्रियते । कृष्णाय राध्यति ईक्षते वा । पृष्टो गर्ग: शुभाशुभं पर्यालोचयति इत्यर्थ: ।

* प्रत्याङ्भ्यां श्रुव: पूर्वस्य कर्ता [1·4·40]
= आभ्यां (प्रति, आङ्) परस्य शृणोते: योगे पूर्वस्य प्रवर्तनारूपस्य व्यापारस्य कर्ता सम्प्रदानं स्यात् । विप्राय गां प्रतिशृणोति, आशृणोति वा । विप्रेण मह्यं देहि इति प्रवर्तित: तं प्रतिजानीते इत्यर्थ: ।

* अनुप्रतिगृणश्च [1·4·41]
⇒ आभ्यां (अनु, प्रति) गृणाते: कारकं पूर्वव्यापारस्य कर्तृभूतम् उक्त-

स्यात्। होत्रेऽनुगृणाति, प्रतिगृणाति।
ता प्रथमं शंसति, तम् अध्वर्युः प्रोत्साहयति इत्यर्थः।

* परिक्रयणे सम्प्रदानम् अन्यतरस्याम् [1·4·44]
= नियतकालं भृत्या स्वीकरणं परिक्रयणं, तस्मिन् साधकतमं कारकं सम्प्रदानसंज्ञं वा स्यात्। 'शतेन शताय वा परिक्रीतः'।

* तादर्थ्ये चतुर्थी वाच्या (वा.)
= मुक्तये हरिं भजति। तादर्थ्य = प्रयोजन

* क्लृपि सम्पद्यमाने च (वा.)
= भक्तिः ज्ञानाय कल्पते, सम्पद्यते, जायते इत्यादि।

* उत्पातेन ज्ञापिते च (वा.)
= वाताय कपिला विद्युत्।

* हितयोगे च (वा.)
= ब्राह्मणाय हितम्

* क्रियार्थोपपदस्य च कर्मणि स्थानिनः [2·3·14]
= क्रियार्था क्रिया उपपदं यस्य तस्य स्थानिनोऽप्रयुज्यमानस्य तुमुनः कर्मणि चतुर्थी स्यात्। फलेभ्यो याति। फलानि आहर्तुं याति इत्यर्थः।
नमस्कुर्मो नृसिंहाय। नृसिंहम् अनुकूलयितुम् इत्यर्थः। एवं स्वयम्भुवे नमस्कृत्य इति आदौ अपि।

* तुमर्थाच्च भाववचनात् [2·3·15]
= 'भाववचनाश्च' इति सूत्रेण यो विहितः तदन्तात् चतुर्थी स्यात्। यागाय याति, यष्टुं याति इत्यर्थः।

* नमः स्वस्ति-स्वाहा-स्वधाऽलंवषड् योगाच्च [2·3·17]
= एभिर्योगे चतुर्थी स्यात्। हरये नमः।
'उपपदविभक्तेः कारकविभक्तिर्बलीयसी' इति सूत्रेण नमस्करोति देवान्। प्रजाभ्यः स्वस्ति। अग्नये स्वाहा। पितृभ्यः स्वधा।

* अलमिति पर्याप्त्यर्थग्रहणम् (वा.)
= तेन दैत्येभ्यो हरिः अलम्, प्रभुः समर्थः, शक्तः इत्यादि।

• चकारः पुनर्विधानार्थः, तेन आशीर्विवक्षायां परामपि 'चतुर्थी चाशिषि' इति सूत्रेण षष्ठीं बाधित्वा चतुर्थ्येव भवति। स्वस्ति गोभ्यो भूयात्।

* मन्यकर्मण्यनादरे विभाषाऽप्राणिषु [२·३·१७]
= प्राणिवर्जे मन्यतेः कर्मणि चतुर्थी वा स्यात् तिरस्कारे। न त्वां तृणं मन्ये तृणाय वा। श्यना निर्देशात् तानादिकयोगे न। न त्वां तृणं मन्वेऽहम्।

* गत्यर्थकर्मणि द्वितीयाचतुर्थ्यौ चेष्टायाम् अनध्वनि [२·३·१२]
= अध्वभिन्ने गत्यर्थानां कर्मणि एते स्तः चेष्टायाम्।
· ग्रामं ग्रामाय वा गच्छति।
चेष्टायां किम्? 'मनसा हरिं व्रजति'।
· अनध्वनीति किम्? पन्थानं गच्छति। गन्त्राधिष्ठितेऽध्वन्येवायं निषेधः। यदा तु उत्पथात् पन्था एवाक्रमितुमिष्यते तदा चतुर्थी भवति एव। उत्पथेन पथे गच्छति। इति चतुर्थी।

अपादान कारक

ध्रुवमपायेऽपादानम् [1·4·24]
= अपायो विश्लेषः, तस्मिन् साध्ये ध्रुवम् अवधिभूतं कारकं अपादानं स्यात्।

* अपादाने पञ्चमी [2·3·28]
= ग्रामाद् आयाति। धावतोऽश्वात् पतति। कारकं किम्? वृक्षस्य पर्णं पतति।

* जुगुप्साविरामप्रमादार्थानाम् - उपसंख्यानम् (वा.)
= पापात् जुगुप्सते, विरमति। धर्माद् प्रमाद्यति।

* भीत्रार्थानां भयहेतुः [1·4·25]
= भयार्थानां त्राणार्थानां च प्रयोगे भयहेतुः अपादानं स्यात्।
चोराद् बिभेति। चोराद् त्रायते।
भयहेतुः किम्? अरण्ये बिभेति, त्रायते वा।

* पराजेरसोढः [1·4·26]
= पराजेः प्रयोगे (परा उपसर्ग + जि धातु) असह्योऽर्थोऽपादानं स्यात्।
अध्ययनात् पराजयते, ग्लायति इत्यर्थः।
असोढः किम्? शत्रून् पराजयते, अभिभवति इत्यर्थः।

* वारणार्थानामीप्सितः [1·4·27]
= प्रवृत्तिविघातो वारणम्। वारणार्थानां धातूनां प्रयोगे ईप्सितः अर्थोऽपादानं स्यात्। यवेभ्यो गां वारयति।
ईप्सितः किम्? यवेभ्यो गां वारयति क्षेत्रे।

* अन्तर्धौ येन अदर्शनमिच्छति [1·4·28]
= व्यवधाने सति यत् कर्तृकस्य आत्मनो दर्शनस्य अभावमिच्छति तद् अपादानं स्यात्। मातुः निलीयते कृष्णः।
अन्तर्धौ किम्? चोरात् न दिदृक्षते। इच्छति ग्रहणं किम्? अदर्शनेच्छायां सत्यां सत्यपि दर्शने यथा स्यात्।

* आख्यातोपयोगे [1·4·29]
= नियमपूर्वकविद्यास्वीकारे वक्ता प्राक्संज्ञः स्यात्।
उपाध्यायादधीते।
उपयोगे किम्? नटस्य गाथां शृणोति।

* जनिकर्तुः प्रकृतिः [1·4·30] ('जनी प्रादुर्भावे' का प्रयोग)
= जायमानस्य हेतुः अपादानं स्यात्। ब्रह्मणः प्रजा प्रजायन्ते।

* भुवः प्रभवः [1·4·31] (भू धातु प्रयोग)
= भवनं भूः। भूकर्तुः प्रभवस्तथा। हिमवतो गङ्गा प्रभवति।
तत्र प्रकाशत इत्यर्थः।

* 'ल्यपलोपे कर्मण्यधिकरणे च' (वा.)
= प्रासादात् प्रेक्षते। आसनात् प्रेक्षते।
प्रासादम् आरुह्य, आसने उपविश्य प्रेक्षते इत्यर्थः।
श्वशुरात् जिह्रेति, श्वशुरं वीक्ष्य इत्यर्थः।

* गम्यमानापि क्रिया कारकविभक्तीनां निमित्तम् (वा.)
⇒ कस्मात् त्वम्? नद्याः।

* यतश्चाध्वकालनिर्माणं तत्र पञ्चमी (वा.)
तद्युक्तादध्वनः प्रथमासप्तम्यौ (वा.)
कालात् सप्तमी च वक्तव्या (वा.)
= वनाद् ग्रामो योजनं योजने वा।
कार्तिक्या आग्रहायणी मासे।

* अन्यारादितरर्तेदिक्शब्दाञ्चूत्तरपदाजाहियुक्ते [2·3·29]
= (अन्य- आरात्- इतर- ऋते- दिक्शब्द- अञ्चूत्तरपद- आच्- आहि)
एतैर्योगे पञ्चमी स्यात्।
• अन्य इत्यर्थग्रहणम्। इतरग्रहणं प्रपञ्चार्थम्। अन्यो भिन्न
इतरो वा कृष्णात्।

आराधनात् ।

ऋते कृष्णात्

· पूर्वो ग्रामात् । दिशि दृष्टः शब्दो दिक्शब्दः । तेन सम्प्रति देशकाल-वृत्तिना योगेऽपि भवति । चैत्रात् पूर्वः फाल्गुनः । अवयववाचि योगे तु न, 'तस्य परमाम्रेडितम्' इति निर्देशात् । पूर्वं कायस्य ।

· अञ्चूत्तरपदस्य तु दिक्शब्दत्वेऽपि 'षष्ठ्यतसर्थ' इति षष्ठीं बाधितुं पृथग्ग्रहणम् । प्राक् प्रत्यग् वा ग्रामात् ।

· आच - दक्षिणा ग्रामात्

· आहि - दक्षिणाहि ग्रामाद्

* अपपरी वर्जने [1·4·88]

= एतौ (अप, परि) वर्जने (निवारणे) कर्मप्रवचनीयौ स्तः ।

* आङ् मर्यादावचने [1·4·89]

= आङ् मर्यादायाम् उक्तसञ्ज्ञः स्यात् । वचनग्रहणाद् अभिविधौ अपि

* पञ्चम्यपाङ्परिभिः [2·3·10]

= एतैः (अप, परि, आङ्) कर्मप्रवचनीयैः योगे पञ्चमी स्यात् ।

· अप हरेः, परि हरेः संसारः । परि अत्र वर्जने । लक्षणादौ तु हरिं परि ।

· आ मुक्तेः संसारः । आ सकलात् ब्रह्म ।

* प्रतिः प्रतिनिधिप्रतिदानयोः [1·4·92]

= एतयोः अर्थयोः प्रतिः उक्तसंज्ञ (कर्मप्रवचनीय) स्यात् ।

* प्रतिनिधिप्रतिदाने च यस्माद् [2·3·11]

= अत्र कर्मप्रवचनीयैः योगे पञ्चमी स्यात् ।

प्रद्युम्नः कृष्णात् प्रति । तिलेभ्यो प्रतियच्छति माषान् ।

* अकर्तर्यृणे पञ्चमी [२·३·२४]
= अकर्तरि ऋणे पंचमी
कर्तृवर्जितं यद् ऋणं हेतुभूतं ततः पंचमी स्यात्।
शताद् बद्धः।
अकर्तरि किम्? शतेन बन्धितः

* विभाषा गुणेऽस्त्रियाम् [२·३·२५]
= गुणे हेतौ अस्त्रीलिङ्गे पञ्चमी वा स्यात्।
जाड्याद् जाड्येन वा बद्धः।
गुणे किम्? धनेन कुलम्। अस्त्रियाम् किम्? बुद्ध्या मुक्तः।
'विभाषा' इति योगविभागाद् गुणे स्त्रियां च क्वचित्।
धूमादग्निमान्, नास्ति घटोऽनुपलब्धेः।

* पृथक्-विना-नानाभिस्तृतीयाऽन्यतरस्याम् [२·३·३२]
= एभिर्योगे तृतीया स्याद् पञ्चमीद्वितीये च।
अन्यतरस्यां ग्रहणं समुच्चयार्थम्, पञ्चमीद्वितीये चानुवर्तते।
पृथक् रामेण, रामाद्, रामं वा। एवं विना, नाना।

* करणे च स्तोकाल्प-कृच्छ्र-कतिपयस्य असत्त्ववचनस्य [२·३·३३]
= एभ्योऽद्रव्यवचनेभ्यः करणे तृतीयापञ्चम्यौ स्तः।
स्तोकेन स्तोकाद् वा मुक्तः। द्रव्ये तु स्तोकेन विषेण हतः।
* दूरान्तिकार्थेभ्यो द्वितीया च [२·३·३५]
= एभ्यो (दूर-अन्तिक) द्वितीया स्यात्, चात् पञ्चमीतृतीये च।
प्रातिपदिकार्थमात्रे विधिरयम्। ग्रामस्य दूरम्, दूराद्, दूरेण वा,
अन्तिकम्, अन्तिकाद्, अन्तिकेन वा।
असत्त्ववचनस्य इत्यनुवृत्तेः नेह - दूरः पन्थाः।
इति पञ्चमी।

* षष्ठी

षष्ठी विभक्ति

* षष्ठी शेषे [२·३·५०]
= कारकप्रातिपदिकार्थ- व्यतिरिक्तः स्वस्वामिभावादिसम्बन्धः शेषः, तत्र षष्ठी स्यात्। राज्ञः पुरुषः।

कर्मादीनामपि सम्बन्धमात्रविवक्षायां षष्ठ्येव। सतां गतम्। सर्पिषो जानीते। मातुः स्मरति। एधो दकस्योपस्कुरुते। भजे शम्भोश्चरणयोः। फलानां तृप्तः।

* षष्ठी हेतुप्रयोगे [२·३·२६]
= हेतुशब्दप्रयोगे हेतौ द्योत्ये षष्ठी स्यात्। अन्नस्य हेतोर्वसति।

* सर्वनाम्नस्तृतीया च [२·३·२७]
= सर्वनाम्नो हेतु- शब्दस्य च प्रयोगे हेतौ द्योत्ये तृतीया स्यात् षष्ठी च। केन हेतुना वसति? कस्य हेतोः?

* निमित्तपर्यायप्रयोगे सर्वासां प्रायदर्शनम् (वा.)
= किं निमित्तं वसति? केन निमित्तेन? कस्मै निमित्ताय? इत्यादि। एवं किं कारणम्? को हेतुः? किं प्रयोजनम्? इत्यादि।

प्रायग्रहणाद् असर्वनाम्नः प्रथमाद्वितीये न स्तः। ज्ञानेन निमित्तेन हरिः सेव्यः, ज्ञानाय निमित्ताय इत्यादि।

* षष्ठ्यतसर्थप्रत्ययेन [२·३·३०]
= एतद् योगे षष्ठी स्यात्। 'दिक्शब्द' इति पञ्चम्या अपवादः। ग्रामस्य दक्षिणतः। पुरः पुरस्तात्। उपरि उपरिष्टात्।

* एनपा द्वितीया [२·३·३१]
= एनप् अन्तेन योगे द्वितीया स्यात्। एनपेति योगविभागात् षष्ठ्यपि। दक्षिणेन ग्रामं ग्रामस्य वा। एवम् उत्तरेण।

* दूरान्तिकार्थैः षष्ठ्यन्यतरस्याम् [2·3·34]
= एतैर्योगे षष्ठी स्यात् पञ्चमी वा।
दूरं निकटं ग्रामस्य ग्रामाद्वा।

* ज्ञोऽविदर्थस्य करणे [2·3·51]
= जानातेः अज्ञानार्थस्य करणे शेषत्वेन विवक्षिते षष्ठी स्यात्।
सर्पिषो ज्ञानम्।

* अधीगर्थदयेशां कर्मणि [2·3·52]
= अधि+इक् ⇒ स्मरणार्थे
एषां कर्मणि शेषे षष्ठी स्यात्। मातुः स्मरणम्।
सर्पिषो दयनम्, ईशनं वा।

* कृञः प्रतियत्ने [2·3·53]
= प्रतियत्नो गुणाधानम्। कृञः कर्मणि शेषे षष्ठी स्यात् गुणाधाने।
एधो दकस्योपस्करणम्।

* रुजार्थानां भाववचनानामज्वरेः [2·3·54]
= भावकर्तृकाणां ज्वरिवर्जितानां रुजार्थानां कर्मणि शेषे षष्ठी स्यात्। चौरस्य रोगस्य रुजा।

* अज्वरिसन्ताप्योरिति वाच्यम् (वा.)
= रोगस्य चौरज्वरः चौरसन्तापो वा।
रोगकर्तृकं चौरसम्बन्धि ज्वरादिकम् इत्यर्थः।

* आशिषि नाथः [2·3·55]
= आशीरर्थस्य नाथतेः शेषे कर्मणि षष्ठी स्यात्।
'सर्पिषो नाथनम्'।
आशिषीति किम्? माणवकनाथनम्, तत् सम्बन्धो या।

जासि-निप्रहण-नाट-क्राथ-पिषां हिंसायाम् [2·3·56]
हिंसार्थानामेषां शेषे कर्मणि षष्ठी स्यात्।
• चौरस्योज्जासनम्।
• निप्रौ संहतौ विपर्यस्तौ व्यस्तौ वा। चौरस्य निप्रहणनम्, प्रणिहननम्, निहननं, प्रहणनं वा।
• 'नट अवस्कन्दने' चुरादिः। चौरस्योन्नाटनम्। चौरस्य क्राथनम्।
• वृषलस्य पेषणम्। हिंसायाम् किम्? धानापेषणम्।

* अवहृपणोः समर्थयोः [2·3·57]
= वि+अव पूर्वक 'हृ' और 'पण्' धातु
शेषे कर्मणि स्यात्। द्युते-क्रयविक्रयव्यवहारे चानयोः तुल्यार्थता।
शतस्य व्यवहरणं पणनं वा।
समर्थयोः किम्? शलाकाव्यवहारः। गणनेत्यर्थः।
ब्राह्मणपणनं स्तुतिरित्यर्थः।

* दिवस्तदर्थस्य [2·3·58]
= द्युतार्थस्य क्रयविक्रयरूपव्यवहारार्थस्य च दिवः कर्मणि षष्ठी स्यात्। शतस्य दीव्यति।
तदर्थस्य किम्? ब्राह्मणं दीव्यति। स्तौतीत्यर्थः।

* विभाषोपसर्गे [2·3·59]
= पूर्वयोगापवादः। शतस्य शतं वा प्रतिदीव्यति।

* प्रेष्यब्रुवोर्हविषो देवतासम्प्रदाने [2·3·61]
= (प्रेष्यब्रुवोः हविषो देवता सम्प्रदाने)
देवतासम्प्रदानेऽर्थे वर्तमानयोः प्रेष्यब्रुवोः कर्मणो हविर्विशेषस्य वाचकात् शब्दात् षष्ठी स्यात्।
• अग्नये छागस्य हविषो वपाया मेदसः प्रेष्य अनुब्रूहि वा।

* कृत्वोऽर्थप्रयोगे कालेऽधिकरणे [२·३·६४]
= कृत्वोऽर्थानां प्रयोगे कालवाचिन्यधिकरणे शेषे षष्ठी स्यात्।
पञ्चकृत्वोऽह्नो भोजनम्। द्विरह्नो भोजनम्।
शेषे किम्? द्विरहन्यध्ययनम्।

* कर्तृकर्मणोः कृति [२·३·६५]
= कृत् योगे कर्तरि कर्मणि च षष्ठी स्यात्।
• कृष्णस्य कृतिः। जगतः कर्ता कृष्णः।

* गुणकर्मणि वेष्यते (वा.) [वा इष्यते]
= नेता अश्वस्य स्रुघ्नस्य स्रुघ्नं वा।
कृति किम्? तद्धिते मा भूत्, कृतपूर्वी कटम्।

* उभयप्राप्तौ कर्मणि [२·३·६६]
= उभयोः प्राप्तिर्यस्मिन् कृति तत्र कर्मणि एव षष्ठी स्यात्।
आश्चर्यो गवां दोहोऽगोपेन।

* स्त्रीप्रत्यययोरकाकारयोर्नायं नियमः (वा.)
= भेदिका बिभित्सा वा रुद्रस्य जगतः।

* शेषे विभाषा (वा.)
= स्त्रीप्रत्यय इत्येके।
• विचित्रा जगतः कृतिः हरेर्हरिणा वा। केचिद् अविशेषेण विभाषाम् इच्छन्ति।

• शब्दानाम् अनुशासनम् आचार्येण आचार्यस्य वा।

* क्तस्य च वर्तमाने [२·३·६७]
= वर्तमानार्थस्य क्तस्य योगे षष्ठी स्यात्। 'न लोक' इति निषेधस्य अपवादः।
• राज्ञां मतो बुद्धः पूजितो वा।

अधिकरणवाचिनश्च [२·३·६८]

क्तस्य योगे षष्ठी स्यात् । इदम् एषाम् आसितं शयितं गतं भुक्तं वा ।

* न लोकाव्ययनिष्ठाखलर्थतृणाम् [२·३·६९]
= (ल, उ, उक, अव्यय, निष्ठा, खलर्थ, तृन्)

एषां प्रयोगे षष्ठी न स्यात् ।

- लादेश :- कुर्वन् कुर्वाणो वा सृष्टिं हरिः ।
- उ - हरिं दिदृक्षुः, अलंकरिष्णुर्वा ।
- उक - दैत्यान् घातुको हरिः
- अव्ययम् - जगत्सृष्ट्वा सुखं कर्तुम् ।
- निष्ठा - विष्णुना हता दैत्याः, दैत्यान् हतवान् विष्णुः ।
- खलर्थाः - ईषत्करः प्रपञ्चो हरिणा ।
- तृन् इति प्रत्याहारः 'शतृशानचौ' इति तृशब्दादथ्य आ तृणो नकारात् । शानन् - सोमं पवमानः । चानश् - आत्मानं मण्डयमानः शतृ - वेदमधीयन् । तृन् - कर्ता लोकान् ।

* कमेरनिषेधः (वा.)
- लक्ष्म्याः कामुको हरिः ।

* द्विषः शतुर्वा (वा.)
- मुरस्य मुरं वा द्विषन् ।

सर्वोऽयं कारकषष्ठ्याः प्रतिषेधः, शेषे षष्ठी तु स्यादेव । ब्राह्मणस्य कुर्वन् । नरकस्य जिष्णुः ।

* अकेनोर्भविष्यदाधमर्ण्ययोः [२·३·७०]
= अक्, इन्, भविष्यत्, आधमर्ण्य

भविष्यत्यकस्य भविष्यदाधमर्ण्यार्थिनश्च योगे षष्ठी न स्यात् सतः पालकोऽवतरति । व्रजं गामी । शतं दायी ।

* कृत्यानां कर्तरि वा [२·३·७१]
= षष्ठी वा स्यात् । मया मम वा सेव्यो हरिः ।
कर्तरि इति किम्? गेयो माणवकः साम्नाम् ।
अत्र योगो (सूत्र) विभज्यते । 'कृत्यानाम्' - 'उभयप्राप्तौ' इति 'न' इति चानुवर्तते । तेन नेतव्या व्रजं गावः कृष्णेन । ततः 'कर्तरि वा' । उक्तोऽर्थः ।

* तुल्यार्थैरतुलोपमाभ्यां तृतीयान्यतरस्याम् [२·३·७२]
= तुल्यार्थैर्योगे तृतीया वा स्यात्, पक्षे षष्ठी । तुल्यः सदृशः समो वा कृष्णस्य कृष्णेन वा ।
अतुलोपमाभ्यां किम्? तुला उपमा वा कृष्णस्य नास्ति ।

* चतुर्थी चाशिष्यायुष्यमद्रभद्रकुशलसुखार्थहितैः । [२·३·७३]
= (च आशिषि- आयुष्य, मद्र, भद्र, कुशल, सुख, अर्थ, हित)
एतदर्थैर्योगे चतुर्थी स्यात् पक्षे षष्ठी ।
· आयुष्यं चिरञ्जीवितं कृष्णाय कृष्णस्य वा भूयात् । एवं मद्रं, भद्रं, कुशलं, निरामयं, सुखं शम्, अर्थः प्रयोजनं हितं पथ्यं वा भूयात् ।
आशिषि किम्? देवदत्तस्यायुष्यम् अस्ति । आख्यानात् सर्वत्र अर्थग्रहणम् । मद्रभद्रयोः पर्यायत्वाद् अन्यतरो न पठनीयः ।

इति षष्ठी ।

अधिकरण कारक

आधारोऽधिकरणम् [1·4·45]

= कर्तृकर्मद्वारा तन्निष्ठक्रियाया आधारः कारकमधिकरणसञ्ज्ञः स्यात् ।

* सप्तम्यधिकरणे च [2·3·36]

= अधिकरणे सप्तमी स्यात्, चकाराद् दूरान्तिकार्थेभ्यः ।
औपश्लेषिको वैषयिकोऽभिव्यापकश्चेति आधारस्त्रिधा ।

- औपश्लेषिक = कटे आस्ते, स्थाल्यां पचति ।
- वैषयिक = मोक्षे इच्छास्ति, शास्त्रे रुचिः, नारायणे भक्तिः
- अभिव्यापक = सर्वस्मिन्नात्मा अस्ति, तिलेषु तैलम्, दुग्धे घृतम् ।

वनस्य दूरे अन्तिके वा । 'दूरान्तिकार्थेभ्यः' इति विभक्ति त्रयेण सह चतस्रोऽत्र विभक्तयः फलिताः। [द्वितीया, पंचमी, षष्ठी, सप्तमी]

* क्तस्येन्विषयस्य कर्मण्युपसंख्यानम् (वा.)
'क्तस्य इन् विषयस्य'

= अधीती व्याकरणे । अधीतम् अनेन इति विग्रहे 'इष्टादिभ्यश्च' इति कर्तरि इनिः ।

* 'साध्वसाधुप्रयोगे च' (वा.)

= साधुः कृष्णो मातरि, असाधुर्मातुले ।

* निमित्तात् कर्मयोगे (वा.)

= निमित्तम् इह फलम् । योगः संयोगसमवायात्मकः ।

- चर्मणि द्वीपिनं हन्ति दन्तयोर्हन्ति कुञ्जरम् ।
केशेषु चमरीं हन्ति सीम्नि पुष्कलको हतः ॥ [इति भाष्यम्]

हेतुतृतीया अत्र प्राप्ता । सीमा अण्डकोशः । पुष्कलको गन्धमृगः ।
योगविशेषे किम्? वेतनेन धान्यं लुनाति ।

* यस्य च भावेन भावलक्षणम् [२·३·३७]
= यस्य क्रियया क्रियान्तरं लक्ष्यते ततः सप्तमी स्यात् ।
· गोषु दुह्यमानासु गतः ।

* अर्हाणां कर्तृत्वेऽनर्हाणाम् अकर्तृत्वे तद्वैपरीत्ये च (वा.)
= सत्सु तरत्सु असन्त आसते । असत्सु तिष्ठत्सु सन्तः तरन्ति ।
सत्सु तिष्ठत्सु असन्तः तरन्ति । असत्सु तरत्सु सन्तः तिष्ठन्ति ।

* षष्ठी चानादरे [२·३·३८]
= अनादराधिक्ये भावलक्षणे षष्ठी सप्तम्यौ स्तः ।
· 'रुदति रुदतो वा प्राव्राजीत्' ।
रुदन्तं पुत्रादिकम् अनादृत्य संन्यस्तवान् इत्यर्थः ।

* स्वामीश्वराधिपतिदायादसाक्षिप्रतिभूप्रसूतैश्च [२·३·३९]
स्वामी, ईश्वर, अधिपति, दायाद, साक्षिन्, प्रतिभू, प्रसूत
= एतैः सप्तभिर्योगे षष्ठीसप्तम्यौ स्तः । षष्ठ्यामेव प्राप्तायां
पाक्षिकसप्तम्यर्थं वचनम् ।
· गवां गोषु वा स्वामी । गवां गोषु वा प्रसूतः ।
गा एव अनुभवितुं जात इत्यर्थः ।

* आयुक्तकुशलाभ्यां चासेवायाम् [२·३·४०]
= आभ्यां योगे षष्ठीसप्तम्यौ स्तः तात्पर्येऽर्थे ।
· आयुक्तो व्यापारितः । आयुक्तो कुशलो वा हरिपूजने
हरिपूजनस्य वा ।

आसेवायाम् किम्? आयुक्तो गौः शकटे । ईषद् युक्त इत्यर्थः

यतश्च निर्धारणम् [२·३·४१]
= जातिगुणक्रियासंज्ञाभिः समुदायाद् एकदेशस्य पृथक्करणं निर्धारणं यतस्ततः षष्ठीसप्तम्यौ स्तः।
- जाति - नृणां नृषु वा द्विजः श्रेष्ठः।
- गुण - गवां गोषु वा कृष्णा बहुक्षीरा।
- क्रिया - गच्छतां गच्छत्सु वा धावन् शीघ्रः।
- संज्ञा → छात्राणां छात्रेषु वा मैत्रः पटुः।

* पञ्चमी विभक्ते [२·३·४२]
= विभागो विभक्तम्। निर्धार्यमाणस्य यत्र भेद एव तत्र पञ्चमी स्यात्। • माथुराः पाटलिपुत्रकेभ्यः आढ्यतराः।

* साधुनिपुणाभ्याम् अर्चायां सप्तम्यप्रतेः [२·३·४३]
= आभ्यां योगे सप्तमी स्याद् अर्चायाम्, न तु प्रतेः प्रयोगे।
• मातरि साधुर्निपुणो वा।
अर्चायां किम्? निपुणो राज्ञो भृत्यः।
इह तत्त्वकथने तात्पर्यम्।

* अप्रत्यादिभिरिति वक्तव्यम् (वा.)
= साधुः निपुणो वा मातरं प्रति परि अनु वा।

* प्रसितोत्सुकाभ्यां तृतीया च [२·३·४४]
= आभ्यां योगे तृतीया स्यात् चात् सप्तमी।
• प्रसित उत्सुको हरिणा हरौ वा।

* नक्षत्रे च लुपि [२·३·४५]
= नक्षत्रे प्रकृत्यर्थे यो लुप्संज्ञया लुप्यमानस्य प्रत्ययस्यार्थः तत्र वर्तमानात् तृतीया- सप्तम्यौ स्तः अधिकरणे।
'मूलेनावाहयेद् देवीं श्रवणेन विसर्जयेत्'। मूले श्रवणे इति वा।

* सप्तमीपञ्चम्यौ कारकमध्ये [२·३·७]

= शक्तिद्वयमध्ये यौ कालाध्वानौ ताभ्याम् एते स्तः। अद्य भुक्त्वा अयं द्व्यहे द्व्यहाद् वा भोक्ता॥ कर्तृशक्त्योः मध्येऽयं देशः। इहस्थोऽयं क्रोशे क्रोशाद्वा लक्ष्यं विध्येत्। कर्तृकर्मशक्त्योर्मध्येऽयं देशः। अधिक शब्देन योगे सप्तमीपञ्चम्यौ इष्येते। 'तदस्मिन्नधिकम्' इति 'यस्मादधिकम्' इति च सूत्र-निर्देशात्। लोके लोकाद् वा अधिको हरिः।

* अधिरीश्वरे [१·४·९७]

= स्वस्वामिसम्बन्धेऽधिः कर्मप्रवचनीयसञ्ज्ञः स्यात्।

* यस्मादधिकं यस्य चेश्वरवचनं तत्र सप्तमी [२·३·९]

= अत्र कर्मप्रवचनीययुक्ते सप्तमी स्यात्।

· उप परार्धे हरेर्गुणाः। परार्धाद् अधिका इत्यर्थः।

ऐश्वर्ये तु स्वस्वामिभ्यां पर्यायेण सप्तमी।

→ अधि भुवि रामः। अधि रामे भूः।

· सप्तमी शौण्डैः इति समासपक्षे तु रामाधीना।

* विभाषा कृञि [१·४·९८]

= अधिः करोतौ प्राक् सञ्ज्ञो वा स्याद् ईश्वरेऽर्थे।

· 'यदत्र मामधिकरिष्यति'। विनियोक्ष्यत इत्यर्थः।

इह विनियोक्तुः ईश्वरत्वं गम्यते।

अगतित्वात् 'तिङि चोदात्तवति' इति निघातो न।

॥ इति सप्तमी ॥

॥ इति कारकादिविभक्तिप्रकरणम् ॥

-:- अधिकरण कारक -:-

* आधारोऽधिकरणम् [1.4.45]

= कर्तृकर्मद्वारा तन्निष्ठक्रियाया आधार: कारकम् अधिकरणसञ्ज्ञ: स्यात्।

* सप्तम्यधिकरणे च [2.3.36]

= अधिकरणे सप्तमी स्यात्, चकाराद् दूरान्तिकार्थेभ्य:।
औपश्लेषिको वैषयिकोऽभिव्यापकश्च इति आधारस्त्रिधा।
कटे आस्ते, स्थाल्यां पचति, मोक्षे इच्छाऽस्ति। सर्वस्मिन्